14. Hafta

# बालकव्यवहारः

आसीत् पुरा सुवर्णपुरे धनवान् कश्चित् वैश्यः। तस्य द्वे भार्ये आस्ताम्। तयोर्ज्यायसी वन्ध्या। कनीयसी तु पुत्रमेकं प्रासूत। ते द्वे अपि तं बालं स्नेहेनापोषयताम्।

अथ कियताऽपि कालेन स वैश्यः कालधर्मं गतः। तस्य सर्वमपि धनं पुत्रिणीं कनीयसीं गच्छति। ज्यायसी तु तन्नासहत। अतः सा व्यचिन्तयत्–'यदि शिशुमिमं मदीयं कथयिष्यामि तर्हि महदिदं भर्तुर्धनं मामेष्यति'- इति। एवं विचिन्त्य सा बालकमादाय प्रतस्थे। कनीयसी तां वारयति स्म।

ततः कलहायमाने ते न्यायाधिपमगच्छताम्। उभे अपि तस्याग्रे 'ममायं शिशुः, ममायं शिशुः, इत्यवदताम्। न्यायाधिपो विवादस्य

रहस्यं जिज्ञासमानः स्वभृत्यमकथयत् – 'यद्युभयोरयं शिशुस्तर्हि तं छित्त्वा समं विभज्य उभाभ्यां यच्छ'- इति ।

तच्छ्रुत्वा ज्यायसी – 'साधु स्वामिन् साधु! एवं क्रियताम्'- इत्युच्चैरवोचत्। कनीयसी तु व्याकुला भूतवा जगाद –'स्वामिन्! तदीय एवायं बालो न मदीयः। तस्मात् सजीवोऽयं तस्यै दीयताम्' इति।

न्यायाधिपस्तदाकर्ण्य स्मयमानः कनीयसीमेव शिशोर्जननीं निश्चित्य तस्यै शिशुमदापयत्। ज्यायसी तु जनैरुपहस्यमाना प्रत्यगच्छत्।